International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 24-26
© 2026 IJMH
www.themultijournal.com
Received: 11-04-2026
Accepted: 02-05-2026
Publish : 04-05-2026

**ऐन्दवी आर्या**
शोधच्छात्रा,
अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**ऐन्दवी आर्या**
शोधच्छात्रा,
अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# शर्ववर्मपाणिनिदिशा भावविचारः

**ऐन्दवी आर्या**

**शोधसारः**

बहुप्रकारके व्याकरणशास्त्रे पाणिनिव्याकरणस्य वैशिष्ट्यं विद्वल्लोके अनुभूयत एव। एवमेव शर्वर्मणा विरचितं कातन्त्राख्यं व्याकरणान्तरं विद्यते। बहवः विषयाः लोकतः सिद्धाः इति मत्वा अस्मिन् व्याकरणे तेषाम् उल्लेखो न दृश्यते। यथा कारकसंज्ञा तथा च यथा पाणिनीये लकाराः बहुविधकालभेदेषु दृश्यन्ते न तथा प्रकृते तावान्तः कालभेदाः सन्ति इतरेषां लोकसिद्धत्वात्। अस्मिन् शोधलेखे प्रत्ययार्थेषु अन्यतमस्य भावस्य कोऽर्थः स्वीकृतः उभयत्र एवमेव भावप्रत्ययान्तस्य एकवचनमात्रे व्यवहारः इत्यादयः विषयाः उल्लिखिताः।

**"लः कर्मणि च भावे चाकर्मकेभ्यः"**[1] इति सूत्रेण सकर्मकेभ्यः धातुभ्यः लकाराः कर्तरि कर्मणि भवन्ति अकर्मकेभ्यः धातुभ्यश्च लकाराः कर्त्तरि भावे च भवन्ति। यथा - पठ व्यक्तायां वाचि इति सकर्मकः धातुः, अस्मात् धातोः कर्तरि वाच्ये चैत्रः पुस्तकं पठति इति कर्मणि तु चैत्रेण पुस्तकं पठ्यते इति सिध्यति। तद्वदेव शीङ् स्वप्ने इति अकर्मकः धातुः, तस्मात् कर्त्तरि भावे च प्रत्ययाः भवन्ति। देवदत्तः शेते इति कर्त्तरि, ताभ्यां शय्यते इति भावे प्रयोगः। क्वचित् सकर्मकाणाम् अपि भावे प्रयोगः दृश्यते। यथा चैत्रेण पच्यते इत्यत्र धातोः प्रत्ययाः अकर्त्तरि सन्ति येन अनुक्तत्वात् कर्त्तरि चैत्रे तृतीया दृश्यते एवमेवात्र कर्मणः अविवक्षा येन कर्मण्यपि प्रत्ययाः न विद्यन्ते। पच् इति सकर्मकाद्धातोः कर्तरि कर्मण्येव प्रत्ययाः भवन्तीति नियमः, कथङ्कृत्वा भावे प्रत्ययाः सिद्धा अत्र इति चेत् कातन्त्रवैय्याकरणेन रभसनन्दिना स्वविरचिते कारकसम्बन्धोद्द्योताख्ये ग्रन्थे उच्यते यत् - **"सकर्मकेभ्योऽपि यदि कर्म न विवक्ष्यते"**[2] इति सकर्मकधातूनां प्रयोगे कर्मणः अविवक्षायां भावे प्रत्ययाः भवन्तीति तदर्थः। यथा पठ्यतेऽस्माभिः, गम्यते देवदत्तेन इत्यादीनि ग्रन्थवृत्तौ उदाह्रितानि। अत्र गम्यते, पठ्यते इत्यत्र पठगमादीनां धातूनां सकर्मकत्वेऽपि प्रकृते कर्म अविवक्षितमतः भावे प्रत्ययाः सिद्धाः।

## कातन्त्रे भावविचारः -

एतेषु उदाहरणेषु कर्तृकर्मणोः बहुत्वेऽपि धातोः प्रथमपुरुषस्यैकवचनमेव सर्वदा प्रयोगार्हं तिङादिभिः प्रत्ययैः व्यापारवाचकत्वात्। को नाम भावः, तस्मिन् वाच्ये कुतः प्रथमपुरुषस्यैकवचने एव रूपाणि सिध्यन्ति सर्वेषु लकारेषु इति चेत् यस्मिन्नर्थे प्रत्ययाः भवन्ति तत्सदृशं लिङ्गमिति विज्ञेयम्। अनेन नियमेन प्रकृते धातोः प्रत्ययाः भावार्थे विहिताः। तत्र वचनविवक्षणात्पूर्वं भावज्ञानमिष्टमतः पूर्वं भावं निरूप्य परं भावगतवचनं प्रतिपाद्यते। भावस्य सत्तार्थकत्वमुच्यते कातन्त्रे। तस्य तदर्थकत्वे प्रमाणं यत् -

**सन्मात्रं भावलिङ्गं स्यादस्पृष्टं यच्च कारकैः।**
**धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते॥**[3]

यः सर्वैः कारकैः अस्पृष्टः सत्तामात्ररूपेण च क्रियासामान्यं बोधयति तादृशः केवलः शुद्धः व्यापारात्मकः धात्वर्थः भावः इति कथ्यते इत्यर्थः। धातोः अर्थद्वयं वैय्याकरणैरभिमतम् - फलं व्यापारश्च। तत्र प्रमाणं यथा -

**फलव्यापारयोः धातुराश्रये तिङः स्मृतः।**
**फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्॥**[4]

इति भूषणसारे धात्वर्थनिरूपणावसरे कौण्डभट्टः। फलव्यापारयोः धातुः स्मृतः नाम फलव्यापारयोः धातुः वाचको भवति तथा च फलव्यापारयोः यौ आश्रयभूतौ तौ तु तिङा उच्येते। कौ तावाश्रयौ इति चेत् फलस्याश्रयः कर्म व्यापाराश्रयश्च कर्त्ता। अस्मिन्नेव श्लोके विशेष्यविशेषणभावोऽपि उक्तः। धात्वर्थभूतयोः फलव्यापारयोः व्यापारः मुख्यः अतः विशेष्ये व्यापारे फलस्य विशेषणत्वेन अन्वयः क्रियते। एवमेव कर्त्ता, कर्म, सङ्ख्या, काल इति ये इतरे तिङर्थाः तेषामपि विशेषणत्वमिति कारिकार्थः। अनया कारिकया ज्ञायते यत् फलं व्यापारश्च धात्वर्थाविति।

"तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वं फलत्वम्" इति फलस्य सामान्यं लक्षणम्। पश्य मृगो धावति इत्यत्र धावनक्रियायाः फलत्वं न सिध्येत् इत्यतः तद्धात्वर्थत्वमित्यत्र पुनः तद्ग्रहणं कृतम्। नागेशमते तु - "कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वम्" इति मञ्जूषायाम्।

"तद्धात्वर्थफलजनकत्वे सति तद्धातुवाच्यत्वं व्यापारत्वम्" इति व्यापारस्य सामान्यं लक्षणम्। प्रकृतधात्वर्थभूतस्य फलस्य यो जनकः प्रकृतधात्वर्थः स एव व्यापारः। भूषणसारेऽपि व्यापार इत्यस्य **"भावनाऽभिधा साध्यत्वेनाऽभिधीयमाना क्रिया"**[5] इत्युक्तम्। मीमांसकानां यस्य पदार्थस्य 'भावना' इत्यनेन व्यवहारः दृश्यते स एव व्यापारः। इतोऽपि स्पष्टयति - साध्यत्वेन अभिधीयमाना क्रियायाः एव धातुवाच्यत्वमिति। तत्र भर्तृहरिं प्रमाणयति कौण्डभट्टः-

**यावत् सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते।**
**आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥**[6]

क्रिया द्विविधा भूतकालिका यथा अपाक्षीत् इत्यादौ। एवमेव अनिष्पन्ना सा च पचति पक्ष्यति इत्यादिभिः बोध्यते। एतयोः निष्पन्नानिष्पन्नयोः द्वयोरपि यथा साध्यत्वेन व्यवहारः तदानीं सकृत्क्रममाश्रित्य क्रियमाणस्यैव व्याकरस्य क्रिया इत्यनेन व्यवहारः। क्रियायां लक्षणमपि यथा - "क्रियते अवयवानां क्रमेण उत्पत्या सा क्रिया" इत्यभिधीयते।

एषा च क्रिया - साध्या एवं सिद्धा इतिरूपेण द्विधा। आख्यातेन उच्यमाना क्रिया सर्वा अपि साध्या क्रिया, तद्वदेव कृत्प्रत्ययैः उच्यमाना क्रिया सिद्धा क्रिया इत्युच्यते। लक्षणे तु - **"क्रियान्तराऽऽकाङ्क्षाऽनुत्थापकतावच्छेदकरूपं साध्यत्वम्"**[7] यस्य धातुमूलकपदस्य उच्चारणेन अपरस्याः क्रियायाः आकाङ्क्षा न जायते सा साध्या क्रिया इति कथ्यते। यथा - पचति पठति गच्छति। यद्यपि एतानि पदानि साधनरूपम् आकाङ्क्षाम् उत्पादयन्ति किं पचति, केन पचति, कस्मिन् को वा पचति इत्यादी। परं क्रियान्तरस्य तु आकाङ्क्षां नैव जनयन्ति इत्यतः एताः साध्याः क्रियाः भवन्ति। एवमेव एतद्विपरीतं यत् **"क्रियान्तराऽऽकाङ्क्षोत्थापकतावच्छेदकत्वं सिद्धत्वम्"**[8] इति कथ्यते। यस्य उच्चारणेन अन्यस्याः क्रियायाः आकाङ्क्षा जायते सा सिद्धा क्रिया इत्युच्यते। यथा - पाकः इति घञन्तपदस्य उच्चारणेन किं पाकः भविष्यति जातः नष्टः इत्यादिरूपेण आकाङ्क्षा दृश्यते। अतः सा सिद्धा क्रिया इति उच्यते।

अत्र पचति पाकः उभयत्र डुपचष् पाके इति समानः धातुः वर्त्तते, तर्हि कथमेकत्र धात्वर्थस्य व्यापारांशस्य साध्यावस्था अपरत्र च सिद्धावस्था क्रिया बुध्यते इति चेत् पचति इत्यत्र तु धातोः स्वभावतः साध्यावस्थापन्ना क्रिया एव गम्यते इति सिद्धान्तपक्षः। तेन स्वभावसिद्धा साध्यार्थकक्रिया तिङादिभिः नैव नश्यते। परं पाकः, कृतः इत्यादिषु घञादिभिः प्रत्ययैः तन्नश्यते। अतः समानधातुत्वेऽपि भिन्नार्थकत्वम्।

मञ्जूषायां नागेशेन "कर्मकर्त्रादिपदवत् पाचकादिपदान्यपि तद्योग्यताविशिष्टद्रव्यवाचकानि, न तु उद्भूतकारकशक्तिप्रतिपादकानि" इति उच्यते। कर्म कर्त्ता इत्यादिवत् पाचकः इत्यादीनि कृदन्तपदान्यपि तत्तद्योग्यताविशिष्टस्य द्रव्यस्यैव वाचकानि भवन्ति, नैतानि पदानि प्रातिपदिकार्थात् उद्भूतत्वेन अर्थात् भेदेन तत्तत् कारकशक्तेः प्रतिपादकानि। प्रातिपदिकार्थस्य योऽर्थः तस्मात् भेदेनाभेदेन वा शक्तिर्विवक्षिता। येन घटम् अथवा घटः कर्म इत्यपि प्रयोगः भवति। एषः विचारः द्वितीयाविभक्तेः कर्मत्वशक्तिमानर्थः इत्यत्र लघुमञ्जूषायां दृश्यते। यदि कर्मत्वशक्तिमान् इति विभक्तेरर्थस्तर्हि तदर्थबोधनार्थं नित्यं विभक्तिः भवितव्या तत्र, येन घटः कर्म इत्यत्र घटस्य कर्मत्वं न सिध्येत् द्वितीयायाः अभावात्। परं तदर्थे प्रयोगस्तु दृश्यते लोके इति पूर्वपक्षः। अस्य समाधानमुच्यते तत्र यदा प्रातिपदिकार्थः अन्येषां विशेषणत्वेन न विवक्षितः परं तन्निष्ठा शक्तिरभेदेन विवक्षिता चेत् घटः कर्म इति प्रयोगः भवति। यदा तु शक्तेः प्रातिपदिकार्थात् भेदेन विवक्षिता तदानीं घटम् इति विभक्त्यन्ततया प्रयोगः दृश्यते। अत्र तिङतिरिक्तप्रत्ययान्तानां विषये तदेव उच्यते यत् उद्भूतकारकशक्तिप्रतिपादकानि न भवन्ति इति अर्थात् प्रतीयमानप्रातिपदिकार्थात् भेदेन नाम विभक्त्यन्ततया कारकशक्तेः प्रतिपादकानि न अपितु एतानि पाचकादीनि पदानि द्रव्यवाचकानि सन्तीति।

**भावे वचनविषयः -**

भावो नाम क्रिया व्यापारो वा इति सिद्धम् एतावता। क्रियायाः वचनं किमिति इतः निरूप्यते। अयं भावः सत्वभूतः असत्वभूतः इति प्रकारेण द्विप्रकारकः। सत्वं नाम द्रव्यम् इत्यर्थः। **"कृदभिहितो भावो द्रव्यवत् प्रकाशते"**[9] इति भाष्यवचनात् पाकः इत्यादिषु विद्यमाना

सिद्धावस्था क्रिया कृद्भिरुक्ता इति तस्याः क्रियायाः एव द्रव्यत्वेन व्यवहारो भवति। गुणाः गुणिनि अन्तर्भूताः भवन्ति, गुणी च द्रव्यमतः लिङ्गम्, वचनम्, विभक्तिश्च गुणिनः क्रियायाः सिद्धावस्थायां दृश्यन्ते। सिद्धा क्रियायाः द्रव्यसदृशव्यवहारस्तु लोके दृश्यत एव यथा - पाकः भवति, पाकौ भवतः, पाकाः भवन्ति अथवा पाके प्रवर्त्तते देवदत्तः, तण्डुलपाकेन ओदनं सिध्यति इत्यादिषु पच् धातोः घञ् प्रत्यये पाकः इति रूपं सिध्यति। कृदन्तत्वात् सिद्धावस्थापन्ना क्रिया उच्यते अनेन प्रयोगेन। तस्याश्च क्रियायाः द्रव्यायमाणत्वात् विभक्तिवचनादिषु अन्वयः सम्पद्यते। नोचेत् क्रियायाः अमूर्त्तत्वात् क्रियायां सर्वत्र लिङ्गविभक्तिवचनैः सह अन्वयो नैव सम्पद्येत। एवञ्च प्रकृते पाकः इत्यादौ विद्यमानसङ्ख्यादिः क्रियागतं सङ्ख्याविभक्त्यादिकं नैव वक्ति अपितु कर्त्रादिकारकगतं विभक्तिवचनमेव दर्शयति।

साध्या क्रिया तु आख्यातप्रत्ययेन बोध्यते। एषा क्रिया द्रव्यवत् न भवति। तदुक्तं भूषणसारे - **"तद्रूपत्वम् असत्त्वभूतत्वम्"**[10] इति। ततः प्राक् साध्यत्वलक्षणं प्रतिपाद्य एतच्च तस्मात् परमुच्यते। तेन प्रकृते तच्छब्देन साध्यत्वरूपस्याः क्रियायाः ग्रहणं प्रसङ्गात्। तिङा बोधितस्याः साध्यक्रियायाः अद्रव्यवत्वं प्रतिपादयति। स्वोक्तवचनं दृढयन् कौण्डभट्टः भर्तृहरिकारिकां प्रमाणयति। सा च कारिका यथा

**सत्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते।**
**असत्वभूतो भावश्च तिङ्पदैरभिधीयते॥**[11]

यदा सत्व-द्रव्यस्वरूपयुक्ता क्रिया अर्थात् सिद्धा क्रिया भवति तदा तस्यां क्रियायां प्रयोगे विभक्तिवचनलिङ्गादीनामन्वयः भवति। परन्तु तिङादिभिः आख्यातप्रत्ययैः असत्वभूतस्याः अद्रव्यभूतस्याः क्रियायाः भानं जायते। क्रियायां लिङ्गं, सङ्ख्या वा विभक्तिर्वा नैव विद्यते। व्यापारस्तु अमूर्त्तः, अमूर्त्ते व्यापारे गुणाः न भवन्तीत्यतः लिङ्गवचनादीनां गुणानां व्यापारेऽन्वयाभावः दृश्यते। तर्हि भावे वच्ये धातोः किं वचनं भवतीति चेत् नियमेन उत्सर्गतः एकवचनमेव स्यात्। तेन धातोः प्रथमपुरुषस्य एकवचने एव भाववाच्ये रूपाणि भवन्ति। सम्प्रति वाक्यपदीयस्य यो ग्रन्थः प्राप्यते तस्मिन् इयं कारिका नैवोपलभ्यते। अस्या उत्तरार्धः भूषणसारे उल्लिखितः पूर्वार्धः पुनः भूषणसारस्य हरिवल्लभविरचितायां 'दर्पण' इति व्याख्यायाम् अस्मिन्नेव प्रसङ्गे उपलभ्यते।

### उपसंहारः -

इत्थं पाणिनिकातन्त्रव्याकरणगतभावविषये कश्चनांशः अत्र प्रतिपादितः। भाव इत्यनेन व्यापारमात्रग्राह्यत्वात् व्यापारस्य च अद्रव्यत्वात् उत्सर्गमेकवचनमेव भावप्रयोगे इत्यादयः विषयाः अत्र यथामति निरूपिताः।

### उपयुक्तग्रन्थसूची-


वैय्याकरणसिद्धान्तलघुमञ्जूषा - राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः, प्रथम संस्करण - २०२१

वैय्याकरणभूषणसारः - चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, तृतीय संस्करण - २००१

कातन्त्रव्याकरणम् - डा.हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी, प्रथम संस्करण २०००

वैय्याकरणसिद्धान्तकौमुदी-मोतीलाल बनारसीदास, दिल्ली २०१९

परिभाषेन्दुशेखरः - चौखम्बा सुरभारती प्रकशन, वाराणसी २०१९

महाभाष्यम् - श्री मोतीलाल बनारसीदास, दिल्ली २०२५

अष्टाध्यायी सूत्रपाठः - रामलाल कपूर ट्रस्ट गुरुबाजार, अमृतसर, पंजाब, द्वितीय संस्करण - २०००

वाक्यपदीयम्- तेलुगु एकाडमी, हैदराबाद, प्रथम संस्करण - १९७४

कारकसम्बन्धोद्द्योतः - राजस्थानी ग्रन्थागार, जोधपुर, राजस्थान, प्रथम संस्करण - २००८


### पादटिप्पणी -

[1]पाणिनिसूत्रपाठः – ३.४.६९

[2]कारकसम्बन्धोद्द्योतः श्लो.- ३

[3]कारकसम्बन्धोद्द्योतः श्लो.- ३ पृ.सं.२८

[4]वै.भू.सा.२

[5]भू.सा.२

[6]वा.प.३.८.१

[7]भू.सा.२

[8]भू.सा.२

[9] म.भा.३.१.४ आ

[10]वै.भू.सा.२

[11]वै.भू.सा.२